Shri Raghunatha Temple MSS. Library,
JAMMU

No. 623 - घ

Title मण्डपकरणम्

Author

Extent ५ **Age**

Subject धर्मशास्त्रम् · अपूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६२३-घ

मलप्रकरणम् (धर्मशास्त्रम्)

खण्डित

नं० ६२३-घ

पत्राणि ५ (पूर्ति: ६ संख्या पर्य्यन्तम्)
(अपूर्णम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्राचीसाधनं। भूपरत्वप्रयादन्यन्नलिख्यते। मंडपकरणं। तस्य परिमाणं। उत्तमो १८। १६ मितो मध्यमो १४। १२ कनि
ष्ठो १२।१० कनिष्ठात्कनिष्ठः ८ अथ हस्तात्मकः। अथवा एकांशो वा मंडपं हस्तोच्चं द्वादशांगुलोच्चं अथवा छायापरहि
तं वा भूमिसमं कुर्यात्। तस्य मंडपस्य भागत्रयं कार्यं मध्यत्रिभागे मध्ये वेदी चतुरस्रा निजचतुर्थांशेन वा पंचमां
शेनोच्चा वा भागाः ३।४।५।७।९।११ एतेषां मध्ये मनसेप्सितभागेनोच्चा विधेया। एवं मध्ये वेदीं कृत्वा तस्याः स
मंताद् द्वादशांगुलांतरे एकहस्तात्मकचतुरस्रकुंडकरणार्थं भित्तिकरणं तदर्थं सूत्रं देयं। तस्य व्यवहारः। पूर्वस्यां दि
शि मध्यवेद्या द्वाविंशांगुलं प्राचीसूत्रं त्यक्त्वा तत्र चिह्नं कार्यं तस्मिन् चिह्ने द्वादशांगुलं कर्कटकं प्रसार्य प्राचीसू
त्रे एवं कुंडमध्यचिह्नं कार्यं तथैव मध्यचिह्ने कर्कटकं स्थाप्य प्राचीसूत्रे एव पूर्वचिह्नं कार्यं। एवं कृते हस्तमात्रं
सूत्रं जातं कुंडार्थं। पूर्वापरं। अतः परं दक्षिणोत्तरं उच्यते। यत्कुंडमध्यार्थचिह्नं कृतं भवति। तस्माच्चिह्नात् पुर
चतुरंगुलं त्यक्त्वा प्राचीसूत्रे कुंडमध्यस्थे चिह्नं कार्यं। पूर्वे तथैव मध्यचिह्नात् पश्चिमे चतुरंगुलं त्यक्त्वा चिह्नं कार्यं।
प्राचीसूत्रे एव। एवं कृते उभयोर्वृत्तार्धयोर्योगे मत्स्ययुग्मं भवति। तयोरुपरि सूत्रं देयं। इति कृते कुंडे दक्षिणोत्तरं
सिद्धं जातं। पुनरपि द्वादशांगुलं कर्कटकं प्रसार्य कुण्डमध्यचिह्ने धृत्वा दक्षिणे चिह्नं कार्यं। तथैव उत्तरे चि
ह्नं कार्यं। ततः परं पूर्वचिह्ने द्वादशांगुलं कर्कटकं स्थाप्य मध्यचिह्नात् चाग्निकोणादारभ्य ईशानकोणपर्यंतं भ्राम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

5 येत्। अर्द्धचंद्राकारो भवति तद्यथा। अमुनां प्रकारेण दक्षिणदिक्के स्थापय अग्निकोणान्नैरृत्यकोणपर्यंतं। एवमेव पश्चि
मदिक्के कर्कटं स्थापय नैरृत्यकोणाद्वायुकोणपर्यंतं भ्रामयेत्। ततः परं उत्तरदिक्के कर्कटं स्थापय वायुकोणादीश
कोणपर्यन्तं भ्रामयेत्। एवं चतुर्भिरर्द्धचंद्रैश्चतुर्षु दिक्षु चत्वारो मत्स्याः संभवन्ति। तेषु चतुर्षु मत्स्येषु चत्वारि सू
त्राणि देयानि। सूत्रेषु दत्तेषु सत्सु चतुरस्रं कुंडं भवति। तेषु सूत्रेषु इष्टिकाभिर्भित्तिर्विधेया। हस्तमात्रा समाना रूपा।
इति सर्वं चतुरस्रं कुंडं। अथ दक्षिणे अर्द्धचंद्राकृति कुंडकरणप्रकार उच्यते। पूर्वदक्षिणोत्तरसूत्रे वर्त्तते तदुपरि म
ध्यवेदीत एकविंशांगुलं सक्तोपल्लवं बाह्यपरं सूत्रं प्रसारितं भवति। तयोरुभयोर्योगे यत्र मत्स्यो संजातो। तत्र म
त्स्ये चतुर्भिर्यूकाभिरधिकं एकोनविंशांगुलं अंगु. १९। यूका ४ कर्कटकं प्रसार्य मत्स्योपरि संस्थापय सूत्राव
धि भ्रामयेत्। प्राशिखलं कुंडं भवति। तस्य ज्या सूत्रं पूर्वापरे पूर्वापरमेव तद्विज्ञातं। अंगुल २८ यव १ एतावत्प्रमाण
ज्या [illegible]। पंचकुंडीनवकुंडीचे पूर्वापरं ज्या सूत्रं। एककुंडीचे दक्षिणोत्तरं ज्या सूत्रं [illegible]। इति दक्षिणे
अर्द्धचंद्राकृति कुंडं। अतःपरं पश्चिमे [illegible] कुंड तस्य प्रकार उच्यते। यत्र प्राची सूत्रे पश्चिमे तस्योपरि मध्यवेदीतो द
क्षिणोत्तरसूत्रं प्रसारितं भवति। तयोर्योगे यत्र मत्स्यो संजातो। तत्र मत्स्ये चतुर्यवाधिकं त्रयोदशांगुलं अंगु ५
ल १३ यव ४ कर्कटकं प्रसार्य मत्स्ये धृत्वा कुंडस्य मध्यात्पश्चिमदिक्प्राचीसूत्रे विधेयम्। पश्चात्कुंडमध्यात्पश्चिमे पारतो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वन्मितं कर्कोटकं धृत्वा भ्रामयेत् । अनुक्रमेणैन वृत्तं कुंडमवतिष्ठते वृत्तविस्तारः अंगुल २७ भवति । इति पश्चिमे वृत्तं कुं
डं । अतः परं उत्तरे १ सं कुंडमुच्यते । यत् दक्षिणोत्तरं सूत्रं वर्त्तते तदुपरि मध्यवेदीतो बाह्यदिशि सप्तांगुलान्तरं यत् एवोप
रायतं सूत्रं । तस्य संयोगे यो मत्स्यस्तस्मिन्मत्स्ये कर्कोटकं अंगुल १४ यव ६ यूका ६ लिक्षा ३ बालाग्र रथरेणु त्रसरेणु प्र
सार्य दक्षिणोत्तरसूत्रे मत्स्ये धृत्वा पूर्वदक्षिणोत्तरसूत्रे कुंडमध्यार्थचिह्नं कोष्ठे । पुनस्तत्र मध्यचिह्ने कर्कोटकं स्था
पयित्वा भ्रामयेत् । येन क्रमेण सम्पूर्णवृत्तविस्तार अंगुल २९ यव ५ । ४ । ६ । ३ । २ । ६ जातः एतस्मिन्वृत्ते वृत्तचतुष्टय(
विधेयं तत्प्रकार उच्यते । कर्कोटकं अंगुल त्रयं प्रसार्य कुंडमध्यचिह्ने संस्थाप्य भ्रामयेत् । तेन क्रमेण प्रथमं
षडंगुलं कर्णिकाख्यं वृत्तं जातं मध्ये । तदुपरि षडंगुलं कर्कोटकं प्रसार्य मध्यचिह्ने धृत्वा भ्रामयेत् । ततः द्वितीयं
केसराख्यं वृत्तं भवति । तदुपरि नवांगुलं कर्कोटकं प्रसार्य मध्यचिह्ने भ्रामयेत् । तेन तृतीयं वृत्तं दलमध्यसू
संज्ञितं जातं तदुपरि पंच मंडलमेव कृतं भवति । तस्य पंचमवृत्तस्य परिमाणं । उच्यते कियतीडवरिता । तस्याः
प्रमाणं अंगुल २ यव ६ यूका ६ लिक्षा ३ बालाग्र ११ रथरेणु ४ त्रसरेणु ७ अतः परं सर्वेषां पंच [illegible] मंडलानां
संपूर्णविस्तार उच्यते । प्रथमवृत्तस्य षडंगुलो विस्तारः । द्वितीयस्य द्वादशांगुलो विस्तारः । तृतीयस्य अष्टादशा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स.प्र. गुलो विस्तारः १८। चतुर्थे तु तस्य चतुर्विंशांगुलो २४ विस्तारः। पंचमे मंडलस्य संपूर्णो विस्तारः। अंगुलानि २६ पर्वः ५
६ पूर्णकाः ५ लिप्ताः ६ वा अंगुलानि २२ एवं ६ एतं पंचमं मंडलं दलाग्रभूमिसंज्ञितं जातं। एतस्मिन्मंडले दलाग्र
ग्राणि तथा रचयेद्यथा द्वे द्वे वहिः स्पृजेत। मध्ये स्वविस्तारतुल्यां वर्त्तां कर्णिकां त्यक्त्वा विहाय स्वेनेत्। खनना
6 भावे कुंडभित्तीः कृत्वा उपरितः षडंगुला सुपर्ता चतुर्विंशत्यंगुलोच्चां कर्णिकां कृत्वा कुंडमध्ये स्थापयेत् दृढ
तया। यथा न चलति तथा। इदं कुंडं अष्टदलं वा चतुर्दलं भवति। इति पद्मकुंडरचना विज्ञेया दृष्टव्या। अतः परं
पंचमं आचार्यकुंडं चतुरस्रं। तत्प्राचीसूत्रादारभ्य ईशानकोणपर्यंतं सूत्रं प्रसार्य कृत्वा। तस्य सूत्रस्य अर्द्धभागं कृ
त्वा तस्मिन्नर्द्धभागे प्रथमं चतुरस्रकुंडरीत्या तेन समानसूत्रेण चतुरस्रं कुंडं कार्य्यं। इति पंचकुंडीकर्त्तव्यता
इति। एकहस्तात्मकानि कुंडानि कुंडानि। एकांगुला कंठा। तत्पश्चात् द्व्यंगुलोच्चा मेखलात्रितयं। तासां प्रथमा
णां या प्रथमं कुंडमुखे सा चतुरंगुलोच्चा चतुरंगुलविस्तृता। ततो द्वितीया षडंगुलोच्चा त्र्यंगुलविस्तृता। तृ
तीया भूमिलग्ना सा त्र्यंगुलोच्चा द्व्यंगुलविस्तृता। एवं मेखला विधेया। मेखलानामुपरि योनिर्विधेया ६
सा द्वादशांगुलविस्तीर्णा अष्टांगुलायता अंगुलद्वयोच्चा। तत्र विवेकः। एकांगुलोच्चा। एकांगुलोपरिधिः। एवं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मिलित्वा द्व्यंगुलो मेखला वृत्तद्वयवती मध्ये विलवती अग्रतो निम्ना पृष्ठत उन्नता। नालं तस्यां भूमिलग्नं विधे
यं। इति योनिस्वरूपं। पंचकुंडी चेच्चतुरस्रं पूर्वे। चंद्रार्धं दक्षिणे। तस्य ज्यारूपं दक्षिणोत्तरं देयं। वृत्तं कुंडं प
श्चिमे। पद्मकुंडं अष्टदलं उत्तरे। इन्द्रेशानयोर्मध्ये चतुरस्रं आचार्यकुंडं विधेयं। एककुंडपक्षे चतुरस्रं वा वृ
त्तं पश्चिमे विधेयं। सर्वकुंडेषु योनिः कर्तव्या। चंद्रार्धे वृत्ते पद्मे योनिः सर्वथा विधेया। त्रिषु कुंडेषु योनिव्यव
हारः। अथ नाभिः। सर्वेषां कुंडानां मध्ये नाभिः पद्माकारा कुंडस्य सदृशी वा भवति। सा नाभिः हस्तमात्रे कुंडे च
तुरंगुलविस्तारा अंगुलद्वयोच्चा भवति। इति नाभिः। इति कुंडरचना। ततउत्तरे वेद्याश्चतुकोणेषु ईशानको
णे ग्रहपीठं चतुर्हस्तं षडंगुलविस्तारं चतुरस्रं। अग्निकोणे मातृकापीठं हस्तमात्रं। नैरृत्यकोणे वास्तुपीठं ह
स्तमात्रं। अग्निकोणे योगिनीक्षेत्रपालपीठं हस्तमात्रं। चतुर्णां पीठानां मुच्चता द्वादशांगुला विधेया। मातृ
कापीठे विशेषः। हस्तमिताद्यतधारा तदर्धं पूर्वभागे शिलारोपणं शिलाभावे इष्टिकाभिर्भित्तिर्विधेया
इति पीठानि। अतः परं स्तंभारोपणं। मध्यमवेदिकोणेषु चत्वारः स्तंभाः अष्टहस्तमिताः। उत्तरवेद्या द्वाद

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्तंभाः पंचहस्तमिताः तेषां रोपणे विशेषः । चत्वारस्तु कोणेषु अष्टौ स्तंभास्ते भवंति दिक्षु विदिक्षु त्रिभाग
स.प्र. सूत्रे यत्र पतंति तत्र तत्र द्वौ द्वौ स्तंभौ पंचमलवेन निखेचनीयाः । रोपणीयाः तेषामग्रे चूल्लाः पंचदशांगुलादीर्घे
७ ण विधेयाः तेषु चूल्लेषु तिर्यक्लं वलिका द्वादश १२ प्रति दिशं त्रयं ३ त्रयं ३ निःक्षेप्याः । एवं कृते चतुर्दिक्षु भि
7 त्याकारो जातः । तदनंतरं मध्यवेदीस्तंभेषु वलिका चतुष्टयं च तिर्यक् चूल्लेषु निःक्षेप्यं । चतुर्णां मेकं जात
एवं कृत्वा कोणे वलिका चतुष्टयं । उत्तरवेदीकोणस्तंभचूल्लादारभ्य मध्यवेदीमध्यवर्ति स्थूलं काष्ठम
यं पश्चे विधेय । एवं स्थूले यस्मिन् चतुर्णां वलिकानां अग्रंताः सम्यक्तया तस्मिन् विंशति दृढतया इति कृ
त्वा वलिकांतरेषु सम्यक्तया दंडा देया (यथा) दृढता भवति । उपरि छादनार्थं मनुष्यारोहणेन न च
लंति बंधे लोहमयैः कीलैर्दृढाः कार्याः इति कृत्वा चतुर्दिक्षु चतुर्द्वाराणि विधेयानि । उत्तमे मंडपे १८।
१४ १६। हस्तात्मके अष्टांगुलाधिक द्विहस्तात्मकं २।८ मध्यमे मंडपे १४।१२ हस्तात्मके द्वारं चतुरंगुलाधि ७
धिक द्विहस्तमात्रकं हस्ताः २ अंगुल ४ अधमे मंडपे १२।१०।८ हस्तात्मके द्वाराणि द्विहस्तात्मकानि विधेः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यानि। इति द्वारस्वरूपं। अथ तोरणस्वरूपं। मंडपद्वाराद्वहिर्हस्तांतरे तोरणस्तंभयुगलं रयुगलं स्वपंचमां

शेनानि खनेत्। पूर्वद्वारदेशे पारस्त पिप्पलमयं स्तंभयुगं। दक्षिणद्वारदेशे। औदुंबरमयं स्तंभयुगं। प पणस्त

श्चिमद्वारदेशे नयावृतो [illegible]ऽश्वत्थस्य स्तंभयुगं। उत्तरद्वारदेशे वटमयं स्तंभयुगं। एतासामुच्छ्रायो

च्यते। अधममध्यमे तोरणस्तंभो पंचहस्तात्मिका। मध्यमे मंडपे षट्हस्तात्मिका। उत्तमे मंडपे सप्तहस्ता

त्मिका स्तंभा। तोरणद्वारविस्तारो च्यते। अधमे मंडपे तोरणद्वारं द्विहस्तात्मकं। मध्यमे तोरणद्वारविस्ता

रं हस्तौ स्त्र्यंगुलानि षट् हु विस्तारं। उत्तमे मंडपे। तोरणद्वारविस्तारं हस्तद्वयं र अंगुला[illegible]द्वादशाधिको वि

स्तारः। इति वलिका उपरि स्थाप्या तासु चतुर्द्वारवलिकासु मध्ये शेवे मंडपे अधमे त्रिसूलाकृति नित्त तत्काष्ट

मयानि। अधमे वै स्पवे मंडपे शंखचक्रगदापद्मादीन्यायुधानि दैर्घ्ये अंगुलानि ध विस्तारं गुलमेकं। म

ध्यमे मंडपे अंगुल ४ यव ४ दैर्घ्ये विस्तारे अंगुलं १ यवः १ उत्तमे मंडपे आयुधकीलाः। अंगुल ५ दैर्घ्ये वि

स्तारे अंगुल १ यव २ सर्वेषां खातमानं। अधमे एकोंगुलं १ मध्यमे अंगुलं १ यवः १ उत्तमे अंगुलं १ यवौ २ एवं कृ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पाः आयुधास्थाने कीलाएवरोपणीयाः। खातुरीयविस्तारः कार्याः। अधमे नवांगुलानि दैर्घ्ये १ विस्तारे त्र्यं
गुल २ यवमितानि। मध्यमे त्रिशूलानि दैर्घ्ये एकादशांगुलानि ११ विस्तारे अंगुल २ यव ६ उत्तमे मंडपे त्रिशू
लकाष्ठानि। अंगुल १३ दैर्घ्ये विस्तारे अंगुल ३ यव २ एवं विधानि हस्तालीमध्ये काष्ठं सरलं तत्पं उभयपार्श्व
तः तिर्यक् यथा त्रिशूलं भवति तथा विधेयं। अतः परं एतेषां खातमुच्यते। अधमे त्रिशूलखाते वलिकायां।
अंगुलद्वयात्मकं मध्यमे त्रिशूलखातं त्रयो दश गुलात्मकं ३। उत्तमे त्रिशूलखातं। चतुरंगुलं। इति खातं
विधिः। एवं हस्तालीमंडपे। पट्टकूले वीऊर्णामये वा कार्पासजे २ उवस्त्रे वा कदाचिदपि वीतलेन रा छादयेत् यथा
छादयेद्यथा वायुना न चलेत्। तृणादिके च चलिते यजमानगृहं चलति। अतः कारणात् दृढं विधेयं। इति
मंडपकरणं। विधानेमंडपे एवं प्रमाणानि आयुधानि विधेयानि। पूर्वद्वारे कंबुः शृंखेन पाखंब दक्षिणे चक्रं। पश्चि
मे गदा। उत्तरे कमलं। वातोरण द्वारमूलेषु कलशान् मंगलांकुरान्। मदद्याःउपरिष्टात् कुर्या चक्रं सुदर्श
नं। इति वचनात् सर्वद्वारे षुतोरणेषु चत्वारमेव विशिष्यते। हस्तत्रयमितं यजमानप्रमाणं वा अष्टास्वंउ ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

परिचूडायुतं यूपं संपादयेत् । अथवा । कदंबा । अश्वत्थ । वैकंकत । पालाश । शाल्मलि । बिल्वजो वा केशसं-
मितो यूपो ब्राह्मणस्य न्यग्रोधाश्वत्थ बिल्वकार्षमर्य्यमयः कंवसम्मितो राजन्यस्य । औदुंबरशाल्मलि
सारदारुमयो नाभिसमानो वैश्यस्य । विभीतकोदुंबरशाल्मलिसारदारमयो वा नाभिसमानो शूद्रस्य ।
ततो दशहस्तात्मकः पंचवर्णो त्मकः प्रत्येकं तु दशदीर्घया न्वितो ध्वजो मंडपोपरि मध्यभागे निवेश्यः ॥
इन्द्रादिदिक्षु तु यथोक्तपरिमाणान् । अथवा हस्तद्वयदीर्घान् यथाविस्तृतिविस्तृतान् दशध्वजान् वंशो-
परि निबद्धान् इन्द्रादिक्रमेण पीत १ रक्त २ श्याम ३ नील ४ शुक्ल ५ धूम्र ६ हरित ७ पंचवर्ण ८ रक्त ९ गौर-
वर्णान् स्थापयेत् । तथाविधवर्णाः इन्द्रादिदिक्षु पताका दीर्घत्रिकोणाः स्थापयेत् । तथाविधवर्णाः इ-
न्द्रादिदिक्षु पताका दीर्घत्रिकोणाः स्थापयेत् । तथाविधवर्णाः इन्द्रादिदिक्षु पताका दीर्घत्रिकोणाः स्थाप-
येत् । मध्यवेदी उपरि आसादे पंचवर्णवितानं श्वेतं रक्तं वा बध्नीयात् । स्तंभांश्च वस्त्रेण वस्त्रेण वेष्टयेत् ।
ध्वजपताकातोरणं तु वक्ष्यमाणलक्षणोक्तं समापयेत् कार्यमित्यर्थः । एवं मंडपं कार्यं । तेषु भेदाः वर्णभेदे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ना। विंशति हस्तमात्रो मंडपो ब्राह्मणस्य षोडशहस्तः क्षत्रियस्य। द्वादशहस्तो वैश्यस्य दशहस्तो वाष्टह
स·प्र· स्तः शूद्रस्य। अथवा द्वादशहस्तादारभ्य द्विद्विहस्तवृद्ध्या अष्टाविंशतिहस्तपर्यंतो मंडपो भवति। ते
९ षां नवानां नव नामानि। घनो घोषो विराजश्च कांचनो वामनाजको। सुघोषो पद्मैरोदस्तो मंडपानामर
१ तो वृतिः। पंचाशद्धस्तमितो विपुलः पंचपंचाशत्समितो विभ्रमः। इति मंडपनामानि। तेषां मुख्या
यः। तत्र षड्हस्तो छ्रायः कनिष्ठो मंडपः। अष्टहस्तो छ्रायो मध्यमः दशहस्तो छ्रायः श्रेष्ठ मंडपः। वि
लासिते भूयस्त्वमंगानलिख्यते। इति निर्णीतो मंडपो विधेयः। इति मण्डपकरणं। एतत्सर्वं अ
धिवासनदिनात्प्राक् विधेयं॥ ॥ ॥ ॥ ॥ ॥

ध्या स ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative